Roll No..........................

Signature of Invigilator .........

Paper Code

BV-204

# पतंजलि विश्वविद्यालय

## University of Patanjali

## Examination June-2022

### बी. ए. व्याकरण, द्वितीयसत्रम्

### व्याकरणम्, चतुर्थपत्रम्

### वैदिकसाहित्यम्

समयः - होरात्रयम् पूर्णाङ्काः 70

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## (खण्ड -क)

**पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः।** ( 15 x3 =45)

**1.** (क) वागाम्भृणीनासदीयसूक्तेषु स्मृताः केचन पञ्च मन्त्रा लेखनीयाः। (5)

(ख) पृष्टेषु पञ्चसु चतुर्णां शब्दार्थपुरस्सरं स्वशब्दैरर्थबोधनम्। (10)

I. अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्।।

II. नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्।।

III. को अद्धा वेद क इह प्रवोचत्कुत आजता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव।।

IV. अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा।।

V. अहं सुवे पितरमस्य मूर्धन्मय योनिरप्स्वन्तः समुद्रे।
ततो वितिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि।।

**2.** (क) पृष्टेषु सप्तसु पञ्चानां मन्त्राणां पूर्तिः करणीयाः। (10)

(i) यन्मनसा ........ (ii) यस्यामतं ........ (iii) इह चेद् ......... (iv) तस्मै तृणं .......
(v) अथाध्यात्मं ...... (vi) तस्यै तपो....... (vii) न तत्र चक्षुर् ..........

(ख) 'उपनिषद्' इति शब्दस्य कोऽभिप्रायः? केनोपनिषदि कति खण्डाः सन्ति अथ च के विषयाः? (05)

**3.** (क) द्वयोः सूत्रयोः अग्रे पञ्च सूत्राणि लेखनीयानि। (05)

(i) मैत्र्यादिषु बलानि (ii) ते व्यक्तसूक्ष्माः गुणात्मानः।

(ख) पृष्टानां पञ्चानां सूत्राणांमर्था बोधनीयाः - (10)

I. जन्मौषाधिमन्त्रतपः समाधिजाः सिद्धयः।

II. कण्ठकूपे क्षुत्पिपासानिवृत्तिः।

III. तत्र प्रत्ययैकतानता ध्यानम्।

IV. क्षणतत्क्रमयोः संयमाद् विवेकजं ज्ञानम्।

V. पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति।

4. (क) श्लोकानां पूर्तिः करणीयाः - (10)

(i) तेषामहं ........................ (ii) अथ चित्तं ................... (iii) सन्तुष्टः सततं .........

(iv) ............... सङ्गविवर्जितः (v) श्रेयो हि .....................

(ख) गीतासु कति अध्यायाः सन्ति? भक्तियोगस्य का महिमा? (05)

5. (क) "प्रतिबोधविदितं मतममृत्वं हि विन्दते" इत्यस्य कोऽभिप्रायः। (05)

(ख) योगदर्शने कति पादाः सन्ति, नामानि च लिखन्तु। (05)

विभूतिपादे कैवल्यपादे च के विषयाः सन्ति?

(ग) नासदीयसूक्तस्य सारं लिखत। (05)

## (खण्ड -ख)

**पृष्टेषु अष्टसु पञ्च प्रश्नाः समाधेयाः। ( 5 x5 =25)**

6. पृष्टानां पञ्चानां मन्त्राणाम् ऋषिदेवताछान्दांसि ज्ञापनीयानि -

(i) तम आसीत् ................ (ii) तिरश्चीनो ................ (iii) अहमेव वात इव .........

(iv) मया सो ...................... (v) नासदासीन्नो ............

7. द्वयोः समाधानं कुरुत -

(i) केनोपनिषदि परमात्मनः किं स्वरूपम्?

(ii) 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टि' - इत्यस्य कोऽभिप्रायः?

8. द्वयोः श्लोकयोः पदच्छेदविभक्तिसमासा लेखनीयाः ।

(i) ये त्वक्षरमनिर्देश्यम् ................। (ii) अनपेक्षः शुचिर्दक्ष ................।

9. द्वयोः प्रश्नयोः समाधानं कुरुत -

(i) 'समाधिः' इत्यस्य किं स्वरूपं योगदर्शनानुसारेण?

(ii) 'कैवल्यम्' इत्यस्य व्याख्या करणीया।

10. द्वयोः समाधानं कुरुत -

(i) ब्रह्मस्वरूपस्य ज्ञानाय कानि-कानि साधनानि सन्ति?

(ii) ब्रह्म देवानामहंकारं कथं निर्मूलं कृतम्?

11. द्वयोः श्लोकयोरर्थं लिखत -

(i) ये तु सर्वाणि ..........................। (ii) यो न हृष्यति ..................।

12. द्वयोर्विष्यात्मकप्रश्नयोः समाधानम् -

(i) कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् व्याख्येया।

(ii) विवेकजं ज्ञानं कथं भवति?

13. वागम्भृणीसूक्तस्य विषयवस्तुनिरूपणं कुर्वन्तु।

---------------x---------------